International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 18-20
© 2020 IJSR
www.anantaajournal.com
Received: 14-11-2019
Accepted: 18-12-2019

**डॉ. टि. उमेशः**
सहाचार्य, मीमांसाविभागः
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपति, आंध्र प्रदेश, भारत ।

Corresponding Author:
**डॉ. टि. उमेशः**
सहाचार्य, मीमांसाविभागः
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपति, आंध्र प्रदेश, भारत ।

# वेदोक्तयागादिकर्मणां लक्षणविचारः

## डॉ. टि. उमेशः

प्रस्तावना

नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये।
नम आहवनीयाय महावेद्यै नमो नमः।।

धर्माधर्मविवेचनार्थं प्रवृत्तं पूर्वमीमांसाशास्त्रम्। तत्र सूत्रकारः भगवान् जैमिनिः ''अथाऽतो धर्मजिज्ञासा'' [1] इति प्रतिज्ञासूत्रेण वेदस्य अर्थज्ञानरूपदृष्टप्रयोजनसिध्यर्थं वेदाध्ययनानन्तरं वेदार्थप्रतिपादकं विचारशास्त्रं पूर्वमीमांसाशास्त्रमवश्यमारम्भणीयम्, वेदार्थरूपः धर्मः जिज्ञासितव्यः इति प्रतिज्ञाय धर्मलक्षणं सूत्रयामास ''चोदना लक्षणोऽर्थो धर्मः'' [2] इति । तदुच्यते "वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः" [3], "वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्मः" [4] इति। वेदप्रतिपाद्यत्वे सति श्रेयस्साधनताकत्वे सति अर्थत्वं धर्मत्वमिति यावत्। स च धर्मः मीमांसकमते यागादिक्रियारूप एव। तत्र यज्ञानां धर्मत्वे भगवतीश्रुतिरपि प्रमाणम्। यथा -

''यज्ञेन यज्ञमयजन्तदेवाः। तानि धर्माणि प्रथमान्यासन्'' [5] इति।

उक्तलक्षणम् ''अग्निहोत्रं जुहुयात् स्वर्गकामः'' इत्यदिषु वर्तते। तेषां वेदबोधितत्वात्, श्रेयः - स्वर्गादि फलसाधनत्वेन विहितत्वाच्च धर्मत्वम् इति ज्ञेयम्।

कर्मकाण्डात्मकस्य वेदस्य पूर्वभागे नित्यनैमित्तिककाम्यादिभेदेन धर्माचरणं विहितम्। साङ्गप्रधानकर्मानुष्ठाने एव स्वर्गादिकर्मजन्यफलसिद्धिरिति मीमांसकानां सिद्धान्तः। तत्र वेदे याग - होम – इष्टि - सत्र – अहीनादि संज्ञाकान्यनेकानि पुरुषश्रेयस्साधनत्वेन विहितानि कर्माण्युपलभ्यन्ते। एतेषां कर्मणां अनुष्ठन उद्देश्यम् ऐहिकामुष्मिकादि तत्कर्मोक्तफलप्राप्तिरेव। अत्र कर्मणां लक्षणदृष्ट्या परिशील्यमाने तेषु कश्चन भेदः अस्तीति अवगम्यते। इदानीं मीमांसाशास्त्रसिद्धान्तमनुस्मृत्य यत्किञ्चित् एकैकस्यापि लक्षणप्रतिपादनेन एकम् अन्यस्मात् कथं भिन्नम् इति तेषु भेदः प्रदर्श्यते। तत्रादौ -

यागः – ''यजति चोदना द्रव्यदेवताक्रियं समुदाये कृतार्थत्वात्'' [6] इत्यनेन सूत्रेण भगवता जैमिनिना पूर्वमीमांसाशास्त्रे चतुर्थाध्याये द्वितीयपादे यागलक्षणं सूत्रितम्। सूत्रेणानेन देवतोद्देश्येन द्रव्यत्यागः, यजति चोदनाचोदितश्च यागः इत्यर्थोऽवगम्यते। द्रव्यदेवतात्मकक्रियारूपस्यैव यागासंज्ञा। तदुक्तं शास्त्रे ''यागस्य रूपद्वयं द्रव्यं देवताच'' इत्यादिना। यजति शब्दबोध्यो यागपदार्थः श्रोयस्साधनताकत्वेन विहितत्वात् धर्मत्वेन परिगृहीतः। स च ''ज्योतिष्टोमेन स्वर्गकामो यजेत, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, चित्रया यजेत पशुकामः'' इत्यादिवाक्यविहितक्रियाविशेषरूपः। अत्र देवतामुद्दिश्य द्रव्यं त्यज्यते इत्यतः द्रव्यदेवतयोः सम्बन्धसाधको क्रियारूपः यागः इति स्पष्टमवगम्यते। कात्यायनश्रौतसूत्रे यागस्वरूप-निर्वचनावसरे इत्थं निरूपितम् । तद्यथा – ''तिष्टद्धोमाः, वषट्कारप्रदानाः, याज्यापुरोनुवाक्यावन्तो यजतयः'' [7] इति। अत्र ये यागाः ते तिष्टतैव होतव्याः, तत्र वषट्कारेण हविर्विनियोगः, एवं याज्यापुरोनुवाक्य-मन्त्रोच्चारणञ्चात्र सम्भवति। अर्थादत्र होमपूर्वप्रैषः, अनुवाक्यम्, आश्रुतप्रत्याश्रुतप्रैष तदनन्तरं याज्योच्चारणम्, तत्पश्चात् दोवतामुद्दिश्य द्रव्यत्यागरूपयागक्रिया। कर्मसमये अध्वर्युः तिष्ठन् वषट्कारेण जुहोति। एवं यथा क्रमेणा स्वर्गादिफलसाधनरूपाः अनुनुष्ठानोपयुक्ताः नैके यागाः ज्योतिमादयः श्रौतप्रपञ्चे श्रूयन्ते ।

होमः - देवतोद्देश्येन त्यक्तस्य द्रव्यस्य अग्नौ प्रक्षेपरूपक्रिया एव होमः। स च हु धात्वर्थकः, जुहोति शब्दबोध्यः, हवनाद्यपरपर्यायसंज्ञकश्च। तत्र कात्यायनमहर्षिणा कात्यायनश्रौतसूत्रे – ''उपविष्टद्धोमाः स्वाहाकार प्रदानाः जुहोतयः'' [8] इति प्रतिपादनेन होमस्वरूपं निरूपितम्। होमे तु उपविश्य तत्तद्देवता-विषयकमन्त्रोच्चारणानन्तरमन्ते स्वाहाकारमुक्त्वा अग्नौ हविः प्रक्षिप्यते। अग्निहोत्रादयः जुहोत्यादिपद-चोदिताः कर्मविशेषाः अत्रोदाहरणयोग्याः।

इष्टिः – ''ऋत्विक् चतुष्टयसम्पाद्य सपत्नीक यजमानकर्तृककर्मनामधेयम्'' [9] इति इष्टिप्रकरणे निरुक्ताचार्येण निरूपितम्। निर्वपति चोदना चोदितत्वम् इष्टिरित्यर्थः। यथा - सौर्यं चरुं निर्वपेत् इत्यादीनि कर्माणि। इज्यते स्वर्गादिफलार्थं जनैरियमितीष्टिरिति विग्रहे इषु इच्छायामिति ''स्त्रियां क्तिन्'' [10] सूत्रेण क्तिन् प्रत्ययेऽनुबन्ध लोपे ष्टुत्वादिकृते इष्टिशब्दो व्युत्पाद्यते। अत्र अध्वर्युः, होता, आग्नीध्रः, ब्रह्मेति चत्वारः ऋत्विजः। अत्र इच्छति शब्देन निष्पन्नोऽयम् इष्टिः। दर्शपूर्णमासप्रभृतयः।

एकाहः, अहीनः, सत्रादयश्च सोमयागस्यैव अनुष्ठेयदिनसंख्यानुसारम् अवान्तरभेदेन विभक्ताः-

तत्र एकाहः - यत्र एकस्मिन्नेव दिने सोमयागारम्भः, समाप्तिश्च सम्भवति तस्यैव एकाहः इत्यभिधानम्। एकाहे सप्तसोमसंस्थाः अनुष्ठेयत्वेन विहिताः। ते च अग्निष्टोम, अत्यग्निष्टोम, उक्थ्य, षोडशी, वाजपेय, अतिरात्र, अोर्यामश्चेति। एते सोमयागाः प्रत्यवायवारणाय त्रैवर्णिकैः अनुष्ठेयाः भवन्ति।

अहीनः - सोमयागस्य द्विरात्रादिषु दिनेषु पुनः पुनरावृत्यानुष्ठानं यत्र भवति सोऽहीनः। द्विरात्रप्रभृति द्वादशरात्रपर्यन्तमनुष्ठेयत्वेन विहितः सोमयागः एव अहीनसंज्ञकः।

सत्रम् - द्वादशाहादूर्ध्वभाविनः संवत्सरतदधिकदिनमनुष्ठेयत्वेन विहितः सोमयागः। एकाहिक तथा अहीनात्मकसोमयागे यजमानः तथा षोडशऋत्विजः भवन्ति। सत्रे तु ये यजमानास्त ऋत्विजः इत्यनेन यजमानानामेव ऋक्वित्वम्, तथैव ऋत्विजामेव यजमानत्वम् इत्यतः वैशिष्ट्यं दृश्यते। अतः बहुभिः ऋत्विग्भिः बहुभिः यजमानैर्वा साध्यं कर्मनामधेयं सत्रमिति याज्ञिकव्यवहारः। अत्र सत्रसंज्ञक सोमयागस्तु अनुष्ठान कालप्रयुक्तेन प्रकारद्वयेन निरूपितः।

1. द्वादशरात्रप्रभृति शतरात्रप्रर्यन्तानि रात्रिसत्रसंज्ञकानि।
2. शतरात्रादूर्ध्वदिनात्मकानि अयनसत्राणीति।

अयनसत्रेषु - गवामयन, आदित्यानामयन, अङ्गिरसायनादयः संवत्सरात्मकायनाद्यनेके सत्रभेदाः।

सत्राऽहीनयोः भेदः

सत्राऽहीनयोः किञ्चिद्वैलक्षण्यं दृश्यते। द्वादशाहो सत्रमहीनश्च इत्युक्तत्वात् कथं तयोः भेदः इत्युक्ते लक्षणभेदेन अङ्गीकर्तुं शक्यते। तच्च ''द्वादशाहमृद्धिकामा उपेयुः, द्वादशाहमृद्धिकामा उपासीरन्'' इति यत्र वैदिकैः त्रयोदशरात्रादिषु आसीरन् उपेयुरिति आसनोपायि चोदनावत्वेन यजमानबहुत्वञ्च तत्र सत्रमिति व्यवह्रियते। तदुक्तलक्षणस्य द्वादशाहेऽपि सत्वात् द्वादशाहस्य सत्रत्वमिति व्यवहारः। तेदवं सूत्रितं भगवता जैमिनिना – ''द्वादशाहस्य सत्रत्वमासनोपायि चोदनेन यजमानबहुत्वेन च सत्रशब्दाभिसंयोगात्'' [11] इति।

एवमेव यत्र वैदिकैः द्विरात्रादिषु अहर्गणेषु यजति चोदनावत्वे सत्यनियतसंख्याककर्तृकत्वेन यजमानबहुत्वनियमाभावात् तत्र अहीन इति व्यवह्रियते। तदुक्तलक्षणस्य द्वादशाहेऽपि सत्वात् द्वादशाहस्य अहीनत्वमित्यपि निर्णयः। तदेवोऽक्तं भगवता जैमिनिना सूत्रे – ''यजतिचोदनादहीनत्वं स्वामिनां चास्थित परिमाणत्वात्'' [12] इति।

यद्यपि ''सत्रमेकः पकृतिवत्'' [13] इत्यनेन द्वादशाहादि सत्रकर्मणः ज्योतिष्टोमविकृतिभूतत्वात् प्रकृतौ ज्योतिष्टोमे उक्त कर्त्रैकत्वनियमं बाधित्वा ऋद्धिकामास्सत्रमासीरन् इत्यादौ औपदेशिककतृबहुत्वविधानात् ''वचनात्तु बहूनां स्यात्'' [14] इत्यनेन सत्रात्मकद्वादशाहे कर्तारः बहवः अभ्युपेयाः। एवं च सत्र कर्मणि ''अन्ये स्युः ऋत्विजः प्रकृतिवत्'' [15] इत्युक्तप्रकारं प्रकृतिभूत ज्योतिष्टोमे यजमानादन्यः ऋत्विजः नास्ति। कुतः इति चेत् सत्रकर्मणि यजमानैरेवार्त्विज्यं कार्यम्, ये जयमानास्त ऋत्विजः इत्यादि वचनेन जघन्य ऋत्विक्पदलक्षित ऋत्विक्कार्योद्देश्येन यजमानकर्तृत्वविधानात् प्राकृतं यजमानभिन्नकर्तृत्वं तथा वरणा-भरणाधिकं च बाध्यते। तथा च – नात्र गौर्दीयते इति नित्यानुवादोऽपि विध्यन्तरशेषत्वात् अत्र संगच्छते।

एवं प्रकारेण याग, होम, इष्टि, सत्र, अहीनादीनां सामान्यलक्षणं स्वरूपञ्च किञ्चित्प्रतिपादितम्।

## सन्दर्भ


1. जै.सू – 1.1.1
2. जै.सू – 1.1.2
3. अ.सं, पृ.सं - 10
4. मी.न्या.प्र, पृ.सं - 1
5. तै.सं – 3.5.11
6. जै.न्या.4-2-13. सू.सं. 23
7. का.श्रौ.सू.(परिभाषाप्रकरणम्) 1-2-6
8. का.श्रौ.(परिभाषाप्रकरणम्) 1-2-7
9. श्रौ.प.नि. (इष्टिप्रकरणम्)
10. अष्टाध्यायी - 3-3-64
11. भा. दी. 10-6-16. सू.सं.59
12. भा. दी. 10-6-16. सू.सं.60
13. जै.सू.वृ – 10.6.45
14. जै.सू.वृ – 10.6.45
15. जै.सू.वृ – 10.6.51
16. जैमिनीयन्यायमाला – पट्टाभिरामशास्त्री, चौखम्बाप्रकाशन, वारणासी, 2016
17. मीमांसामञ्जरी - तङ्गस्वामिशर्मा, भारतीयदार्शनिकानुसन्धानपरिषत्, नवदेहली, 1996
18. भाट्टदीपका (प्रभावलीव्याख्यासहितः) - खण्डदेवाचार्यः, सद्गुरु पब्लिकेशन्स्, नवदेहली जैमिनिसूत्रवृत्तिः (सुबोधिनी) - रामेश्वरसूरी, चौखम्बा संस्कृतप्रतिष्ठान, देहली
19. मीमांसान्यायप्रकाशः (सारविवेचिनीव्याख्यासहितः)- चिन्नस्वामिशास्त्री, चौखम्बासंस्कृतसंस्थानम्, वारणासी, 2016